# अषिक्कोट् महोदयः संस्कृतकुलपतिः।



अशोकन् पुरनाट्टुकरा।

विश्वेऽस्मिन् राजकीय–सांस्कृतिक–सामूहीक–धैषणिकादि–मण्डलेषु स्वकीयं प्रभावं प्रसारयतः अनेकान् महापुरुषान् दृष्टवन्तः सन्ति साक्षराः अत एव अराक्षसाश्च मानवाः। परन्तु स्वकीयेन, प्रभावेण समस्तान्यपि मण्डलानि उद्धृतवान् यः कोपि आसीच्चेत् तन्नाम, एकस्मिन्नेव युज्यते सुमुकार् अषिक्कोट् इत्यस्मिन्।

बाल्य एव पित्रोः निर्देशात् संस्कृतं पठितुं लब्धावसरः अयं विश्वप्रसिद्धस्य कोषिक्कोट् विश्वविद्यालयस्य कुलपतिपर्यन्तं प्रावर्तत। प्रभाषणपटुत्वेन लब्धाङ्गीकारस्यास्य विविधविषयसंबन्धीनी प्रभाषणानि केरलीयवैज्ञानिकमण्डलम् इदानीमपि पुलकयन्ति। संस्कृतमेव भारतस्य पृष्ठाटास्थिः इति समर्थितेनानेन संस्कृतस्य प्रतिष्ठापनाय कृताः प्रयत्नाः असंख्याकाः सन्ति। न केवलं स्वकीयावासे उपविश्य लेखनद्वारा उत वा महासदत्सु प्रभाषणद्वारा परन्तु मध्याह्ने कर्कशं सूर्यातपं सोढ्वा संस्कृतप्रणयिभिः सह षेध–

प्रतिषेध–प्रकटनानां नेतृत्वं प्रदाय संस्कृतभक्तान् अनुग्रहशतैः सम्पुष्टीकृतवन्। अस्य वियोगः न केवलं संस्कृतप्रेमिणः अपि तु समेषामपि राष्ट्रियाणां नित्यनष्टमेव।

'तत्त्वमसि' इति महोत्तमः ग्रन्थः उपनिषदां सर्वस्वभूतं स्वारस्यं केरलीयान् बोधयितुं प्राभवत्। अनेन तु 'तत्त्वमसि सुकुमारः' इत्यपि सुवर्णपत्रं तन्मकुटमलङ्करोति।

राष्ट्रपितुः महात्मागान्धिनः भक्तवत्सलोऽयं राष्ट्रस्य समग्रविकासाय स्वकीयाः बहवः पद्धतयः आसूत्रितवान्।

यद्यपि संस्कृताध्यापकः नासीत्तथापि केरलीयसंस्कृताध्यापकानां कुलपतिरूपेण आतीतदशकेषु अस्य नित्यसान्निध्यं स्मरन्त्येव प्रमाणपूर्वकं संस्कृताध्यापकाः। यत्र यत्र संस्कृतसंघोष्ठ्यः प्रचलन्ति केवलं दूरवाणीज्ञापनेनैव तत्रागत्य संस्कृतं जनकीयवत्कर्तुं अनेन कृताः परिश्रमाः वाग्भिः वर्णनागोचराः। अनेन सम्पादकेन सह तत्संबन्धः दशकानि यावत् रूढः। यत्र यत्र उपदेशादिकमावश्यकं तत्र तत्र संस्कृतस्य उन्नयने तस्माल्लब्धाः उपदेशाः इदानीमपि सिरासु जाग्रन्ति।

एकदा केरलीयसंस्कृताध्यापकसंघस्य राज्यस्तरीयमेलायां प्रोद्घाटकरूपेण आमन्त्रितः आसीदयम्। तस्मिन् वर्षे 'अर्णोस्–पातिरि'महोदयस्य शवकुटीरात् ज्वालिता दीपशिखा कस्मिन्नपि अश्वरथद्वारा नगरस्थं नीराञ्जलीमण्डपं आनेतुमेव कृतनिश्चयाः स्मः।

अस्मिन् स्थाने तृश्शिवपुरे अश्वाः नैव सिद्धाः इति जानन्ति खलु। तदर्थं बहुदूरात् किमपि अश्वशकटम् आनीतम्। पषुविल् इति स्थानात् दीपशिखां प्रज्वाल्य तत्शकटस्थे संस्कृतबान्धवे निक्षिप्य तत्पुरः "संस्कृतस्य कृते क्रियमाणमश्वमेधम्" इति उच्चभाषिणीद्वारा उद्घुष्य पुरस्थे कार् याने आगच्छन्नासम्। बुभुक्षया यात्रया च अत्यन्तं श्रान्तः अश्वः शकटं वोढुं असमर्थः तदा तदा विद्यामानेषु ऊर्ध्वमार्गेषु अपतत् ।

यथाकथञ्चित् तन्नीत्वा चेर्प् पर्यन्तम् आगतवान्। मार्गे तत्र तत्र विद्यमानाः विद्यालयाः दीपशिखायाः स्वीकरणमपि अकुर्वन्। सार्धदशवादने नगरस्थसभाङ्गणे दीपशिखातः भद्रदीपं प्रज्वाल्य उद्घाटनं कर्तुमेवासीत् कार्यक्रमः।

अयमस्माकं गुरुवरः निमन्त्रणमनुसृत्य दशवादन एव मण्डपं प्राप्तवान्। सार्धैकदशवादनपर्यन्तं प्रतिपाल्य दीपं वा शिखां वा निमन्त्रारं वा अदृष्ट्वा प्रकुपितोऽभवत्। यथाकथञ्चित् दीपशिखां त्यक्त्वा यानान्तरेण मण्डपं प्राप्तोऽहं समारोहस्य उद्घाटनार्थं तम् अभ्यार्थयम्।

यावत् दीपशिखा आगच्छति तावत् पर्यन्तं उद्घाटनभाषणं दीर्घीकार्यमित्यपि श्रोत्रयोः न्यमन्त्रयम्।

उद्घाटनप्रभाषणारंभात् पञ्चचत्वारिंशत् निमेषानन्तरम् अश्वं शकटमपि अंसयोः वहन्तः संस्कृतस्य सन्नद्धसेवकाः तत्र संप्राप्ताः। एतद्दृश्यं दृष्ट्वा सः प्राभाषत। "एतादृशे अश्वशकटे एव दीपशिखा

आगमिष्यतीति पूर्वमेव उक्तः आसीच्चेत् अहं श्वः परश्वः वा आगन्तुं सन्नद्धः अभविष्यम्" इति।

तन्महागुरोः पादयोः प्रणम्य मया पूर्वश्रुतं श्लोकांशमुच्चरितम्।

“यत् यत् कर्म करोमि

तत् तदखिलं शंभो तवाराधनम्।" इति।

